# ॥ वाल्मीकि रामायण ॥

## ५ सुन्दरकाण्ड

### अध्याय ६१

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः ।
दृष्ट्वैवोद्विग्नहृदयो वाक्यमेतदुवाच ह ॥ १॥

उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम ।
अभयं ते भवेद्वीर सत्यमेवाभिधीयताम् ॥ २॥

स तु विश्वासितस्तेन सुग्रीवेण महात्मना ।
उत्थाय च महाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ॥ ३॥

नैवर्क्षरजसा राजन्न त्वया नापि वालिना ।
वनं निसृष्टपूर्वं हि भक्षितं तत्तु वानरैः ॥ ४॥

एभिः प्रधर्षिताश्चैव वारिता वनरक्षिभिः ।
मधून्यचिन्तयित्वेमान्भक्षयन्ति पिबन्ति च ॥ ५॥

शिष्टमत्रापविध्यन्ति भक्षयन्ति तथापरे ।
निवार्यमाणास्ते सर्वे भ्रुवौ वै दर्शयन्ति हि ॥ ६॥

इमे हि संरब्धतरास्तथा तैः सम्प्रधर्षिताः ।
वारयन्तो वनात्तस्मात्क्रुद्धैर्वानरपुङ्गवैः ॥ ७॥

ततस्तैर्बहुभिर्वीरैर्वानरैर्वानरर्षभाः ।
संरक्तनयनैः क्रोधाद्धरयः सम्प्रचालिताः ॥ ८॥

पाणिभिर्निहताः के चित्के चिज्जानुभिराहताः ।
प्रकृष्टाश्च यथाकामं देवमार्गं च दर्शिताः ॥ ९॥

एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि ।
कृत्स्नं मधुवनं चैव प्रकामं तैः प्रभक्ष्यते ॥ १०॥

एवं विज्ञाप्यमानं तु सुग्रीवं वानरर्षभम् ।
अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ ११॥

किमयं वानरो राजन्वनपः प्रत्युपस्थितः ।
कं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥ १२॥

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ।
लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १३॥

आर्य लक्ष्मण सम्प्राह वीरो दधिमुखः कपिः ।
अङ्गदप्रमुखैर्वीरैर्भक्षितं मधुवानरैः ॥ १४॥

नैषामकृतकृत्यानामीदृशः स्यादुपक्रमः ।
वनं यथाभिपन्नं तैः साधितं कर्म वानरैः ॥ १५॥

दृष्टा देवी न सन्देहो न चान्येन हनूमता ।
न ह्यन्यः साधने हेतुः कर्मणोऽस्य हनूमतः ॥ १६॥

कार्यसिद्धिर्हनुमति मतिश्च हरिपुङ्गव ।
व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम् ॥ १७॥

जाम्बवान्यत्र नेता स्यादङ्गदस्य बलेश्वरः ।
हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ १८॥

अङ्गदप्रमुखैर्वीरैर्हतं मधुवनं किल ।
विचिन्त्य दक्षिणामाशामागतैर्हरिपुङ्गवैः ॥ १९॥

आगतैश्च प्रविष्टं तद्यथा मधुवनं हि तैः ।
धर्षितं च वनं कृत्स्नमुपयुक्तं च वानरैः ।
वारिताः सहिताः पालास्तथा जानुभिराहताः ॥ २०॥

एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह ।
नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥ २१॥

दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः ।
अभिगम्य यथा सर्वे पिबन्ति मधु वानराः ॥ २२॥

न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ ।
वनं दात्त वरं दिव्यं धर्षयेयुर्वनौकसः ॥ २३॥

ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः ।
श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्च्युताम् ॥ २४॥

प्राहृष्यत भृशं रामो लक्ष्मणश्च महायशाः ।
श्रुत्वा दधिमुखस्येदं सुग्रीवस्तु प्रहृष्य च ।

वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥ २५ ॥

प्रीतोऽस्मि सौम्य यद्भुक्तं वनं तैः कृतकर्मभिः ।
मर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् ॥ २६ ॥

इच्छामि शीघ्रं हनुमत्प्रधानान्
शाखामृगांस्तान्मृगराजदर्पान् ।
द्रष्टुं कृतार्थान्सह राघवाभ्यां
श्रोतुं च सीताधिगमे प्रयत्नम् ॥ २७ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com